विनाम्। नैषां प्रतिग्रहोदेयो न शिला तारयेच्छिलाम्” मनुः।

**अव्रत्य** त्रि॰ व्रताय हितम् यत् न॰त॰। व्रतकाले- अनाचरणीयेऽन्नतकथनादौ “अव्रत्यं वा व्याहरति तन्मिथ्या करोति व्रतम्” शत॰ब्रा॰।

**अश** संहतौ-व्याप्तौ च स्वादि॰आत्म॰ सक॰ वेट्। अश्नुते आशिष्ट आष्ट आनशे। अशिता—अष्टा अक्ष्यते- अशिष्यते अश्नुवानः अष्टिः व्याष्टिः समष्टिः “ख प्राष्टषेण्यैरिव चानशेऽब्दैः” भट्टिः “प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः” रघुः।

**अश** भोजने क्र्यादि॰ पर॰सक॰ सेट्। अश्नाति आशीत्। आश। अशिता अशिष्यति। ‘त्र्यहं परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः, मनुः तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः” गीता।

**अशकुन** पु॰ न॰अप्राशस्त्ये न॰त॰। दुर्निमित्ते अनिष्टसूचके काकादिदर्शने। अशकुनाश्च द्विविधा औत्पातिकाः साधरणाः काकादिदर्शनादयोऽसाधारणाः। अमङ्गलशब्दे २१७, १८ पृष्ठे विवरणम् “अपयाति सरोषया निरस्ते कृतकं कामिनि चुक्षुवे मृगाक्ष्या। कलयन्निव सव्यथोऽवतस्थेऽशकुनेन स्खलितं” किलेतरेण” माघः। “सा- हस्य नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः” नैष॰।

**अशक्त** त्रि॰ न॰त॰ “समर्थभिन्ने १कार्य्याक्षमे” २पूर्व्वोत्पन्नमशक्तं नियतं महदादिसूक्ष्मपर्य्यन्तम्” सा॰का॰।

**अशक्ति** स्त्री अभावे न॰त॰। १सामर्थ्याभावे “श्रमेण तदशक्त्या वा न गुणानामियत्तया” रघुः। २अपाटवे सांख्यमतसिद्धे बुद्धेः ३ज्ञानजननासामर्थ्यभेदे च सा च “एष प्रत्ययसर्गो विपर्य्ययोऽशक्तितुष्टिसिद्ध्याख्यः” इति सामान्यत उक्त्वा “पञ्च विपर्य्ययभेदाः भवन्त्यशक्तिश्च करणवैकल्यात्। अष्टाविंशतिभेदा” इति। अशक्तीर्विभज्य “एकादशेन्द्रिय बधाः सह बुद्धिबधैरशक्तिरुद्दिष्टा। सप्तदश बधा बुद्धेर्विपर्य्ययात् तुष्टिसिद्धीनाम्” सा॰का॰ “बाधिर्य्यं, कुष्टिताऽन्धत्वं, जड़ताऽजिघ्रता तथा। मूकता, कौण्यपङ्गुत्वक्लैव्योदावर्त्तमन्दताः”। यथासंख्यं श्रोत्रादीनामिन्द्रियाणां बधाः एतावत्येव तद्धेतुका बुद्धेरशक्तिः स्वव्यापारे भवति। तथाचैकादशहेतुकत्वादेकादशधा बुद्धेरशक्तिरुच्यते। हेतुहेतुमतोरभेदविवक्षया च सामानाधिकरण्यम्। तदेवमिन्द्रियबधद्वारेण बुद्धेरशक्तिमुक्त्वा स्वरूपतोऽशक्तीराह सह बुद्धिबधैरिति। कति बुद्धेः स्वरूपतोबधा इत्यत आह सप्तदश बधा बुद्धेः, कुतः? विपर्य्ययात्तुष्टिसिद्धीनाम्, तुष्टयोनवधेति तद्विपर्य्ययास्तन्निरूपणान्नवधा भवन्ति। एवं सिद्धयोऽष्टाविति तद्विपर्य्ययास्तन्निरूपणात् अष्टौ भवन्तीति” सा॰कौ॰दर्शिता। व्याख्यातञ्चैतदस्माभिः,“पूर्व्वार्द्धे ज्ञानेन्द्रियाणाम् अपाटवमुक्त्वाऽर्द्धे कर्मेन्द्रियाणामिति मनसस्तु उभयेन्द्रियानुकूल्यादन्तेऽभिनिवेश इति भेदः। तत्र बाधिर्य्यं श्रोत्रगतं शब्दग्रहणापाटवम्। कुष्ठिता त्वग्गतं स्पर्शग्रहणापाटवम्। अन्धत्वं नेत्रगतं रूपग्रहणापाटवम्। जड़ता रसनागतं रसग्रहणापाटवम्। मूकता वागिन्द्रियगतं वचनापाटवम्। कौण्यं हस्तगतमादानापाटवम्। पङ्गुत्वं पादगतं चलनापाटवम्। क्लैव्यमुपस्थगतं मैथुनासामर्थ्यम्। उदावर्त्तः अपानगतं विष्ठोत्सर्गासामर्थ्यम्। मन्दता मनोगतं सुखादिविषयग्रहणासामर्थ्यम्। एकादशेति पञ्च ज्ञानेन्द्रियाणि पञ्च कर्म्मेन्द्रियाणि मनश्चेति एकादशेन्द्रियाणां बधाः स्वस्वकर्म्माक्षमत्वरूपा धर्मभेदाः तद्धेतुकत्वात् बुद्धेः स्वविषयाग्रहणमिष्यते अतो बुद्धेरशक्तिरेकादशविधैवेत्याह तथा चेत्यादि। ये बुद्धेः सप्तदश भेदा उत्तरार्द्धे वक्ष्यन्ते तैः सप्तदशभिः सह मिलिता एकादश भेदाः अष्टाविंशतिभेदाः स्युः। तथा च शक्तिरष्टाविंशतिभेदा इति यदुक्तं तत् समर्थितमिति”

**अशकुम्भी** स्त्री अश्नुते व्याप्नोति अश—अच् अशा स्कुभ्नाति जलमाप्नोति स्कुन्भ—बा॰—ट पृषो॰सलोपः टित्त्वात् ङीप् कर्म्म॰। अल्पकालेन जलव्यापके जलोपरिजाते (पाना) इति ख्याते तृणभेदे।

**अशक्य** त्रि॰ न शक्यते शक—क्यप् न॰त॰। असाध्ये “अशक्यशङ्कव्यभिचारहेतुर्वाणी न वेदा यदि सन्तु के तु” नैष॰।

**अशङ्का** स्त्री अभावे न॰त॰। १संशयाभावे २त्रासाभावे च न॰त॰। ३तच्छून्ये त्रि॰।

**अशङ्कित** त्रि॰ शकि—क्त न॰त॰। १अभीते २सन्देहरहिते च।

**अशत्रु** पु॰ न शातयति शद—ण्यर्थे त्रुन् न॰त॰। १चन्द्रे शब्दच॰। विरोधे न॰त॰। शत्रुभिन्ने २मित्रे च।

**अशन** न॰ पु॰ अश्नुते व्याप्नोति अश-ल्यु। १पीतसालवृक्षे दन्त्यमध्योऽप्ययमत्रार्थे। भावे ल्युट्। २व्याप्तौ, ३भोजने च “मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्” ति॰त॰स्मृ॰। कर्म्मणि ल्युट्। ४भोज्ये अन्ने न॰ “पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्। दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्व्वशः। पूजितं ह्यशनं नित्यं बलमूर्जञ्च यच्छति। अपूजितं च तद्भुक्तम्” मनुः। “एवं